# Bhavanopanishat or Shri Chakropanishad

# ભાવનોપનિષત્ અથવા શ્રીચક્રોપનિષત્

## Document Information

Text title : Bhava (Bhavana) Upanishad

File name : bhaava.itx

Category : upanishhat, svara

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Kannan Subramanian, NA

Proofread by : P.P.Narayanaswami (swami at math.mun.ca), NA

Description-comments : 84/108; Atharva Veda, Shakta Upanishad, 87/108 in 108 Upanishads Vasudev Lakshman Pansikar

Latest update : April 22, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# ભાવનોપનિષત્ અથવા શ્રીચક્રોપનિષત્

સ્વાવિદ્યાપદતત્કાર્યં શ્રીચક્રોપરિ ભાસુરમ્ ।
બિન્દુરૂપશિવાકારં રામચન્દ્રપદં ભજે ॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવા । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યોઽરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

અથ ભાવનોપનિષત્ ।
હરિઃ ૐ ।
આત્માનમખણ્ડમણ્ડલાકારમવૃત્ય સકલબ્રહ્માણ્ડમણ્ડલં
સ્વપ્રકાશં ધ્યાયેત્ । ૐ શ્રીગુરુઃ સર્વકારણભૂતા શક્તિઃ ।
તેન નવરન્ધ્રરૂપો દેહઃ । નવશક્તિરૂપં શ્રીચક્રમ્ ।
વારાહી પિતૃરૂપા । કુરુકુલ્લા બલિદેવતા માતા । પુરુષાર્થાઃ
સાગરાઃ । દેહો નવરત્નદ્વીપઃ । ત્વગાદિસપ્તધાતુભિરનેકૈઃ
સંયુક્તાઃ સઙ્કલ્પાઃ કલ્પતરવઃ । તેજઃ કલ્પકોદ્યાનમ્ । રસનયા
ભાવ્યમાના મધુરામ્લતિક્તકટુકષાયલવણભેદાઃ ષડ્રસાઃ
ષડૃતવઃ ક્રિયાશક્તિઃ પીઠમ્ । કુણ્ડલિની જ્ઞાનશક્તિર્ગૃહમ્ ।
ઇચ્છાશક્તિર્મહાત્રિપુરસુન્દરી । જ્ઞાતા હોતા જ્ઞાનમગ્નિઃ
(જ્ઞાનમર્ઘ્યમ્) જ્ઞેયં હવિઃ । જ્ઞાતૃજ્ઞાનજ્ઞેયાનામભેદભાવનં
શ્રીચક્રપૂજનમ્ । નિયતિસહિતાઃ શ‍ૃઙ્ગારાદયો નવ રસા
અણિમાદયઃ । કામક્રોધલોભમોહમદમાત્સર્યપુણ્યપાપમયા
બ્રાહ્મ્યાદ્યષ્ટશક્તયઃ । (આધરનવકમ્ મુદ્રાશક્તયઃ ।)
પૃથિવ્યપ્તેજોવાય્વાકાશશ્રોત્રત્વક્ચક્ષુર્જિહ્વાઘ્રાણવાક્પાણિપાદપાયૂપસ્થમનોવિકારાઃ
(કામાકર્ષિણ્યાદિ) ષોડશ શક્તયઃ ।
વચનાદાનગમનવિસર્ગાનન્દહાનો(પાદાનો)પેક્ષા(ખ્ય)-

ભુઙ્દ્વયોઽનઙ્ગકુસુમાદિશક્તયોઽષ્ટૌ । અલમ્બુસા
કુહૂર્વિશ્વોદરી વરુણા હસ્તિજિહ્વા યશસ્વત્યશ્વિની ગાન્ધારી
પૂષા શઙ્ખિની સરસ્વતીડા પિઙ્ગલા સુષુમ્ના ચેતિ ચતુર્દશ
નાડ્યઃ । સર્વસંક્ષોભિણ્યાદિચતુર્દશારગા દેવતાઃ ।
પ્રાણાપાનવ્યાનોદાનસમાનનાગકૂર્મકૃકરદેવદત્તધનઞ્જયા ઇતિ
દશ વાયવઃ । સર્વસિદ્ધિપ્રદા દેવ્યો બહિર્દશારગા દેવતાઃ ।
એતદ્વાયુદશકસંસર્ગોપાધિભેધેન રેચકપૂરકશોષકદાહપ્લાવકા
(રેચકઃ પાચકઃ શોષકો દાહકઃ પ્લાવકા ઇતિ) પ્રાણમુખ્યત્વેન
પઞ્ચધોઽસ્તિ (જઠરાગ્નિર્ભવતિ) । ક્ષારકો દારકઃ ક્ષોભકો
મોહકો જૃમ્ભક ઇત્યપાલનમુખ્યત્વેન પઞ્ચવિધોઽસ્તિ ।
તેન મનુષ્યાણાં મોહકો દાહકો (નાગપ્રાધાન્યેન પઞ્ચબિધાસ્તે
મનુષ્યાણાં દેહગા) ભક્ષ્યભોજ્યશોષ્યલેહ્યપેયાત્મકં
ચતુર્વિધમન્નં (પઞ્ચવિધમન્નં) પાચયતિ। એતા
દશ વહ્નિકલાઃ સર્વજ્ઞત્વાદ્યન્તર્દશારગા દેવતાઃ ।
શીતોષ્ણસુખદુઃખેચ્છાસત્ત્વરજસ્તમોગુણા વશિન્યાદિશક્તયોઽષ્તૌ ।
શબ્દસ્પર્શરૂપરસગન્ધાઃ પઞ્ચતન્માત્રાઃ પઞ્ચપુષ્પબાણા
મન ઇક્ષુધનુઃ । વશ્યો વાણો રાગઃ પાશઃ । દ્વેષોઽઙ્કુશઃ ।
અવ્યક્તમહત્તત્ત્વમહદહઙ્કાર ઇતિ કામેશ્વરી-વજેશ્વરી-
ભગમાલિન્યોઽન્તસ્ત્રિકોણાગ્રગા દેવતાઃ । (નિરુપાધિકસંવિદેવ
કામેશ્વર । સદાનન્દપૂર્ણ સ્વાત્મેવ પરદેવતા લલિતા ।
લૌહિત્યમેતસ્ય સર્વસ્ય વિમર્શ । અનન્યચિત્તત્વેન ચ
સિદ્ધિઃ । ભાવનાયાઃ ક્રિયા ઉપચરઃ । અહં ત્વમસ્તિ નાસ્તિ
કર્તવ્યમકર્તવ્યમુપાસિતવ્યમિતિ વિકલ્પાનામાત્મનિ વિલાપનમ્ હોમઃ ।
ભવનાવિષયાણામભેદભવના તર્પણમ્ ।) પઞ્ચદશતિથિરૂપેણ
કાલસ્ય પરિણામાવલોકનસ્થિતિઃ પઞ્ચદશનિત્યાઃ । શ્રદ્ધાનુરૂપા
ધીર્દેવતા । તયોઃ કામેશ્વરી સદાનન્દઘના પરિપૂર્ણસ્વાત્મૈક્યરૂપા
દેવતા । સલિલમિતિ લૌહિત્યકારણં સત્ત્વમ્ । કર્તવ્યમકર્તવ્યમિતિ
ભાવનાયુક્ત ઉપચારઃ । અસ્તિ નાસ્તીતિ કર્તવ્યતાનૂપચારઃ ।
બાહ્યાભ્યન્તઃકરણાનાં રૂપગ્રહણયોગ્યતાસ્ત્વિત્યાવાહનમ્ ।
તસ્ય બાહ્યાભ્યન્તઃકરણાનામેકરૂપવિષયગ્રહણમાસનમ્ ।
રક્તશુક્લપદૈકીકરણં પાદ્યમ્ । ઉજ્જ્વલદામોદાનન્દાસનદાનમર્ઘ્યમ્ ।
સ્વચ્છં સ્વતઃસિદ્ધમિત્યાચમનીયમ્ । ચિચ્ચન્દ્રમયીતિ

સર્વાઙ્ગસ્રવણં સ્નાનમ્ । ચિદગ્નિસ્વરૂપપરમાનન્દશક્તિસ્ફુરણં
વસ્ત્રમ્ । પ્રત્યેકં સપ્તવિંશતિધા
ભિન્નત્વેનેચ્છાજ્ઞાનક્રિયાત્મકબ્રહ્મગ્રન્થિમદ્રસતન્તુબ્રહ્મનાડી
બ્રહ્મસૂત્રમ્ । સ્વવ્યતિરિક્તવસ્તુસઙ્ગરહિતસ્મરણાં વિભૂષણમ્ ।
સચ્ચિત્સુખપરિપૂર્ણતાસ્મરણં ગન્ધઃ । સમસ્તવિષયાણાં
મનસઃ સ્થૈર્યેણાનુસંધાનં કુસુમમ્ । તેષામેવ સર્વદા સ્વીકરણં
ધૂપઃ । પવનાવચ્છિન્નોર્ધ્વજ્વલનસચ્ચિદુલ્કાકાશદેહો દીપઃ ।
સમસ્તયાતાયાતવર્જ્યં નૈવેદ્યમ્ । અવસ્થાત્રયાણામેકીકરણં તામ્બૂલમ્ ।
મૂલાધારાદાબ્રહ્મરન્ધ્રપર્યન્તં બ્રહ્મરન્ધ્રાદામૂલાધારપર્યન્તં
ગતાગતરૂપેણ પ્રાદક્ષિણ્યમ્ । તુર્યાવસ્થા નમસ્કારઃ ।
દેહશૂન્યપ્રમાતૃતાનિમજ્જનં બલિહરણમ્ । સત્યમસ્તિ
લર્તવ્યમકર્તવ્યમૌદાસીન્યનિત્યાત્મવિલાપનં હોમઃ । સ્વયં
તત્પાદુકાનિમજ્જનં પરિપૂર્ણધ્યાનમ્ । એવં મુહૂર્તત્રયં (મુહૂર્તદ્વિતયં
મુહૂર્તમાત્રં વા) ભાવનાપરો જીવન્મુક્તો ભવતિ સ એવ શિવયોગીતિ
ગદ્યતે। આદિમતેનાન્તશ્ચક્રભાવનાઃ । તસ્ય દેવતાત્મૈક્યસિદ્ધિઃ ।
ચિન્તિતકાર્યાણ્યયત્નેન સિદ્ધ્યન્તિ । સ એવ શિવયોગીતિ કથ્યતે ।
કાદિહાદિમતોક્તેન ભાવના પ્રતિપાદિતા । જીવન્મુક્તો ભવતિ । ય એવં
વેદ । ઇત્યુપનિષત્ । (સોઽથર્વશિરોઽધીતે ।)

ૐ ભદ્રં કર્ણેભિઃ શ્ૃણુયામ દેવા । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાઁ સસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ।
સ્વસ્તિ નસ્તાર્ક્ષ્યોઽરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇત્યથર્વણવેદે ભાવનોપનિષત્સમ્પૂર્ણા ॥

There are 2-3 different versions of this upaniShat. We have followed the
108-120 upaniShashads' collection.
Encoded and proofread by P. P. Narayanaswami (swami at math.mun.ca), NA

*Bhavanopanishat or Shri Chakropanishad*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*